# Raghuvansha 16 by Kalidas

# રઘુવંશં સર્ગઃ ૧૬ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha16

File name : raghuvansha16.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : November 01, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૬ કાલિદાસકૃતમ્

અથેતરે સપ્તરઘુપ્રવીરા જ્યેષ્ઠં પુરોજન્મતયા ગુણૈશ્ચ ।
ચક્રુઃ કુશં રત્નવિશેષભાજં સૌભ્રાત્રમેષાં હિ કુલાનુકારિ ॥ ૧૬-૧॥

તે સેતુવાર્તાગજબન્ધમુખૈરભ્યુચ્છ્રિતાઃ કર્મભિરપ્યવન્ધ્યૈઃ ।
અન્યોન્યદેશપ્રવિભાગસીમાં વેલાં સમુદ્રા ઇવ ન વ્યતીયુઃ ॥ ૧૬-૨॥

ચતુર્ભુજાંશપ્રભવઃ સ તેષાં દાનપ્રવૃત્તેરનુપારતાનામ્ ।
સુરદ્વિપાનામિવ સામયોનિર્ભિન્નોઽષ્ટધા વિપ્રસસાર વંશઃ ॥ ૧૬-૩॥

અથાર્ધરાત્રે સ્તિમિતપ્રદીપે શય્યાગૃહે સુપ્તજને પ્રબુદ્ધઃ ।
કુશઃ પ્રવાસસ્થકલત્રવેષામદૃષ્ટપૂર્વાં વનિતામપશ્યત્ ॥ ૧૬-૪॥

સા સાધુસાધારણપાર્થિવર્દ્ધેઃ સ્થિત્વા પુરસ્તાત્પુરહૂતભાસઃ ।
જેતુઃ પરેષાં જયશબ્દપૂર્વં તસ્યાઞ્જલિં બન્ધુમતો બબન્ધ ॥ ૧૬-૫॥

અથાનપોઢાર્ગલમપ્યગારં છાયામિવાદર્શતલં પ્રવિષ્ટામ્ ।
સવિસ્મયો દાશરથેસ્તનૂજઃ પ્રોવાચ પૂર્વાર્ધવિસૃષ્ટતલ્પઃ ॥ ૧૬-૬॥

લબ્ધાન્તરા સાવરણેઽપિ ગેહે યોગપ્રભાવો ન ચ લક્ષ્યતે તે ।
બિભર્ષિ ચાકારમનિર્વૃતાનાં મૃણાલિની હૈમમિવોપરાગમ્ ॥ ૧૬-૭॥

કા ત્વં શુભે કસ્ય પરિગ્રહો વા કિં વા મદભ્યાગમકારણં તે ।
આચક્ષ્વ મત્વા વશિનાં રઘૂણાં મનઃ પરસ્ત્રીવિમુખપ્રવૃત્તિઃ ॥ ૧૬-૮॥

તમબ્રવીત્સા ગુરુણાનવદ્યા યા નીતપૌરા સ્વપદોન્મુખેન ।
તસ્યાઃ પુરઃ સંપ્રતિ વીતનાથાં જાનીહિ રાજન્નધિદેવતાં મામ્ ॥ ૧૬-૯॥

વસ્વૌકસારામભિભૂય સાહં સૌરાજ્યબદ્ધોત્સવયા વિભૂત્યા ।
સમગ્રશક્તૌ ત્વયિ સૂર્યવંશ્યે સતિ પ્રપન્ના કરુણામવસ્થામ્ ॥ ૧૬-૧૦॥

વિશીર્ણતલ્પાટ્ટશતો નિવેશઃ પર્યસ્તસાલઃ પ્રભુણા વિના મે ।
વિડમ્બયત્યસ્તનિમગ્નસૂર્યં દિનાન્તમુગ્રાનિલભિન્નમેઘમ્ ॥ ૧૬-૧૧॥

નિશાસુ ભાસ્વત્કલનૂપુરાણાં યઃ સંચરોઽભૂદભિસારિકાણામ્ ।
નદન્મુખોલ્કાવિચિતામિષાભિઃ સ વાહ્યતે રાજપથઃ શિવાભિઃ ॥ ૧૬-૧૨॥

આસ્ફાલિતં યત્પ્રમદાકરાગ્રૈર્મૃદઙ્ગધીરધ્વનિમન્વગચ્છત્ ।
વન્યૈરિદાનીં મહિષૈસ્તદમ્ભઃ શ‍ૃઙ્ગાહતં ક્રોશતિ દીર્ઘિકાણામ્ ॥ ૧૬-૧૩॥

વૃક્ષેશયા યષ્ટિનિવાસભઙ્ગાન્મૃદઙ્ગશબ્દાપગમાદલાસ્યાઃ ।
પ્રાપ્તા દવોલ્કાહતશેષબર્હ્યાઃ ક્રીડામયૂરા વનબર્હિણત્વમ્ ॥ ૧૬-૧૪॥

સૂપાનમાર્ગેષુ ચ યેષુ રામા નિક્ષિપ્તવત્યશ્ચરણાન્સરાગાન્ ।
સદ્યોહતન્યઙ્કુભિરસ્રદિગ્ધં વ્યાઘ્રૈઃ પદં તેષુ નિધીયતે મે ॥ ૧૬-૧૫॥

ચિત્રદ્વિપાઃ પદ્મવનાવતીર્ણાઃ કરેણુભિર્દત્તમૃણાલભઙ્ગાઃ ।
નખાઙ્કુશાઘાતવિભિન્નકુમ્ભાઃ સંરબ્ધસિંહપ્રહૃતં વહન્તિ ॥ ૧૬-૧૬॥

સ્તમ્ભેષુ યોષિત્પ્રતિયાતનાનામુત્ક્રાન્તવર્ણક્રમધૂસરાણામ્ ।
સ્તનોત્તરીયાણિ ભવન્તિ સઙ્ગાન્નિર્મોકપટ્ટાઃ ફણિભિર્વિમુક્તાઃ ॥ ૧૬-૧૭॥

કાલાન્તરશ્યામસુધેષુ નક્તમિતસ્તતો રૂઢતૃણાઙ્કુરેષુ ।
ત એવ મુક્તાગુણશુદ્ધયોઽપિ હર્મ્યેષુ મૂર્ચ્છન્તિ ન ચન્દ્રપાદાઃ ॥ ૧૬-૧૮॥

આવર્જ્ય શાખાં સદયં ચ યાસાં પુષ્પાણ્યુપાત્તાનિ વિલાસિનીભિઃ ।
વન્યૈઃ પુલિન્દૈરિવ વાનરૈસ્તાઃ ક્લિશ્યન્ત ઉદ્યાનલતા મદીયાઃ ॥ ૧૬-૧૯॥

રાત્રાવનાવિષ્કૃતદીપભાસઃ કાન્તામુખશ્રીવિયુતા દિવાપિ ।
તિરસ્ક્રિયન્તે કૃમિતન્તુજાલૈર્વિચ્છિન્નધૂમપ્રસરા ગવાક્ષાઃ ॥ ૧૬-૨૦॥

બલિક્રિયાવર્જિતસૈકતાનિ સ્નાનીયસંસર્ગમનાપ્નુવન્તિ ।
ઉપાન્તવાનીરગૃહાણિ દૃષ્ટ્વા શૂન્યાનિ દૂયે સરયૂજલાનિ ॥ ૧૬-૨૧॥

તદર્હસીમાં વસતિં વિસૃજ્ય મામભ્યુપેતું કુલરાજધાનીમ્ ।
હિત્વા તનું કારણમાનુષીં તાં યથા ગુરુસ્તે પરમાત્મમૂર્તિમ્ ॥ ૧૬-૨૨॥

તથેતિ તસ્યાઃ પ્રણયં પ્રતીતઃ પ્રત્યગ્રહીત્પ્રાગ્રહરો રઘૂણામ્ ।
પૂરપ્યભિવ્યક્તમુખપ્રસાદા શરીરબન્ધેન તિરોબભૂવ ॥ ૧૬-૨૩॥

તદદ્ભુતં સંસદિ રાત્રિવૃત્તં પ્રાતર્દ્વિજેભ્યો નૃપતિઃ શશંસ ।
શ્રુત્વા ત એનં કુલરાજધાન્યા સાક્ષાત્પતિત્વે વૃતમભ્યનન્દન્ ॥ ૧૬-૨૪॥

કુશાવતીં શ્રોત્રિયસાત્સ કૃત્વા યાત્રાનુકૂલેઽહનિ સાવરોધઃ ।
અનુદ્રુતો વાયુરિવાભ્રવૃન્દૈઃ સૈન્યૈરયોધ્યાભિમુખઃ પ્રતસ્થે ॥ ૧૬-૨૫॥

સા કેતુમાલોપવના બૃહદ્ભિર્વિહારશૈલાનુગતેવ નાગૈઃ ।
સેના રથોદારગૃહા પ્રયાણે તસ્યાભવજ્જંગમરાજધાની ॥ ૧૬-૨૬॥

તેનાતપત્રામલમણ્ડલેન પ્રસ્થાપિતઃ પૂર્વનિવાસભૂમિમ્ ।
બભૌ બલૌઘઃ શશિનોદિતેન વેલામુદન્વાનિવ નીયમાનઃ ॥ ૧૬-૨૭॥

તસ્ય પ્રયાતસ્ય વરૂથિનીનાં પીડામપર્યાપ્તવતીવ સોઢુમ્ ।
વસુંધરા વિષ્ણુપદં દ્વિતીયમધ્યારુરોહેવ રજશ્છલેન ॥ ૧૬-૨૮॥

ઉદ્યચ્છમાના ગમનાય પશ્ચાત્પુરો નિવેશે પથિ ચ વ્રજન્તી ।
સા યત્ર સેના દદૃશે નૃપસ્ય તત્રૈવ સામગ્ર્યમતિં ચકાર ॥ ૧૬-૨૯॥

તસ્ય દ્વિપાનાં મદવારિસેકાત્ખુરાભિઘાતાચ્ચ તુરંગમાણામ્ ।
રેણુઃ પ્રપેદે પ્રથિ પઙ્કભાવં પઙ્કોઽપિ રેણુત્વમિયાય નેતુઃ ॥ ૧૬-૩૦॥

માર્ગૈષિણી સા કટકાન્તરેષુ વૈન્ધ્યેષુ સેના બહુધા વિભિન્ના ।
ચકાર રેવેવ મહાવિરાવા બદ્ધપ્રતિશ્રુન્તિ ગુહામુખાનિ ॥ ૧૬-૩૧॥

સ ધાતુભેદારુણયાનનેમિઃ પ્રભુઃ પ્રયાણધ્વનિમિશ્રતૂર્યઃ ।
વ્યલઙ્ઘયદ્વિન્ધ્યમુપાયનાનિ પશ્યન્પુલિન્દૈરુપપાદિતાનિ ॥ ૧૬-૩૨॥

તીર્થે તદીયે ગજસેતુબન્ધાત્પ્રતીપગામુત્તરતોસ્ય ગઙ્ગામ્ ।
અયત્નબાલવ્યજનીબભૂવુર્હંસા નભોલઙ્ઘનલોલપક્ષાઃ ॥ ૧૬-૩૩॥

સ પૂર્વજાનાં કપિલેન રોષાદ્ભસ્માવશેષીકૃતવિગ્રહાણામ્ ।
સુરાલયપ્રાપ્તિનિમિત્તમમ્ભસ્ત્રૈસ્રોતસં નૌલુલિતં વવન્દે ॥ ૧૬-૩૪॥

ઇત્યધ્વનઃ કૈશ્ચિદહોભિરન્તે કૂલં સમાસાદ્ય કુશઃ સરય્વાઃ ।
વેદિપ્રતિષ્ઠાન્વિતતાધરાણાં યૂપાનપશ્યચ્છતશો રઘૂણામ્ ॥ ૧૬-૩૫॥

આધૂય શાખાઃ કુસુમદ્રુમાણાં સ્પૃષ્ટ્વા ચ શીતાન્સરયૂતરંગાન્ ।
તં ક્લાન્તસૈન્યં કુલરાજધાન્યાઃ પ્રત્યુજ્જગામોપવનાન્તવાયુઃ ॥ ૧૬-૩૬॥

અથોપશલ્યે રિપુમગ્નશલ્યસ્તસ્યાઃ પુરઃ પૌરસખા સ રાજા ।
કુલધ્વજસ્તાનિ ચલધ્વજાનિ નિવેશયામાસ બલી બલાનિ ॥ ૧૬-૩૭॥

તં શિલ્પિસંઘાઃ પ્રભુણા નિયુક્તાસ્તથાગતાં સંભૃતસાધનત્વાત્ ।
પુરં નવીચક્રુરપાં વિસર્ગાન્મેઘા નિદાઘગ્લપિતામિવોર્વીમ્ ॥ ૧૬-૩૮॥

તતઃ સપર્યાં સપશૂપહારાં પુરઃ પરાર્ધ્યપ્રતિમાગૃહાયાઃ ।

ઉપોષિતૈર્વાસ્તુવિધાનવિદ્ભિર્નિર્વર્તયામાસ રઘુપ્રવીરઃ ॥ ૧૬-૩૯॥

તસ્યાઃ સ રાજોપપદં નિશાન્તં કામીવ કાન્તાહૃદયં પ્રવિશ્ય ।
યથાર્હમન્યૈરનુજીવિલોકં સંભાવયામાસ યથાપ્રધાનમ્ ॥ ૧૬-૪૦॥

સા મન્દુરાસંશ્રયિભિસ્તુરંગૈઃ શાલાવિધિસ્તમ્ભગતૈશ્ચ નાગૈઃ ।
પૂરાબભાસે વિપણિસ્થપણ્યા સર્વાઙ્ગનદ્ધાભરણેવ નારી ॥ ૧૬-૪૧॥

વસન્સ તસ્યાં વસતૌ રઘૂણાં પુરાણશોભામભિરોપિતાયામ્ ।
ન મૈથિલેયઃ સ્પૃહયાંબભૂવ ભર્ત્રે દિવો નાપ્યલકેશ્વરાય ॥ ૧૬-૪૨॥

અથાસ્ય રત્નગ્રથિતોત્તરીયમેકાન્તપાણ્ડુસ્તનલમ્બિહારમ્ ।
નિઃશ્વાસહાર્યાંશુકમાજગામ ઘર્મઃ પ્રિયાવેશમિવોપદેષ્ટુમ્ ॥ ૧૬-૪૩॥

અગસ્ત્યચિહ્નાદયનાત્સમીપં દિગુત્તરા ભાસ્વતિ સંનિવૃત્તે ।
આનન્દશીતામિવ બાષ્પવૃષ્ટિં હિમસ્રુતિં હૈમવતીં સસર્જ ॥ ૧૬-૪૪॥

પ્રવૃદ્ધતાપો દિવસોઽતિમાત્રમત્યર્થમેવ ક્ષણદા ચ તન્વી ।
ઉભૌ વિરોધક્રિયયા વિભિન્નૌ જાયાપતી સાનુશયાવિવાસ્તામ્ ॥ ૧૬-૪૫॥

દિને દિને શૈવલવન્ત્યધસ્તાત્સોપાનપર્વાણિ વિમુઞ્ચદમ્ભઃ ।
ઉદ્દણ્ડપદ્મં ગૃહદીર્ઘિકાણાં નારીનિતમ્બદ્વયસં બભૂવ ॥ ૧૬-૪૬॥

વનેષુ સાયંતનમલ્લિકાનાં વિજૃમ્ભણોદ્ગન્ધિષુ કુડ્મલેષુ ।
પ્રત્યેકનિક્ષિપ્તપદઃ સશબ્દં સંખ્યામિવૈષાં ભ્રમરશ્ચકાર ॥ ૧૬-૪૭॥

સ્વેદાનુવિદ્ધાર્દ્રનખક્ષતાઙ્કે ભૂયિષ્ઠસંદિષ્ટશિખં કપોલે ।
ચ્યુતં ન કર્ણાદપિ કામિનીનાં શિરીષપુષ્પં સહસા પપાત ॥ ૧૬-૪૮॥

યન્ત્રપ્રવાહૈઃ શિશિરૈઃ પરીતાન્રસેન ધૌતાન્મલયોદ્ભવસ્ય ।
શિલાવિશેષાન્યધિશય્ય નિન્યુર્ધારાગૃહેષ્વાતપમૃદ્ધિવન્તઃ ॥ ૧૬-૪૯॥

સ્નાનાર્દ્રમુક્તેષ્વનુધૂપવાસં વિન્યસ્તસાયંતનમલ્લિકેષુ ।
કામો વસન્તાત્યયમન્દવીર્યઃ કેશેષુ લેભે બલમઙ્ગનાનામ્ ॥ ૧૬-૫૦॥

આપિઞ્જરા બદ્ધરજઃકણત્વાન્મઞ્જુર્યુદારા શુશુભેઽર્જુનસ્ય ।
દગ્ધ્વાપિ દેહં ગિરિશેન રોષાત્ખણ્ડીકૃતા જ્યેવ મનોભવસ્ય ॥ ૧૬-૫૧॥

મનોજ્ઞગન્ધં સહકારભઙ્ગં પુરાણશીધું નવપાટલં ચ ।
સંબધ્નતા કામિજનેષુ દોષાઃ સર્વે નિદાઘાવધિના પ્રમૃષ્ટાઃ ॥ ૧૬-૫૨॥

જનસ્ય તસ્મિન્સમયે વિગાઢે બભૂવતુર્દ્વૌ સવિશેષકાન્તૌ ।
તાપાપનોદક્ષમપાદસેવૌ સ ચોદયસ્થૌ નૃપતિઃ શશી ચ ॥ ૧૬-૫૩॥

અથોર્મિલોલોન્મદરાજહંસે રોધોલતાપુષ્પવહે સરય્વાઃ ।
વિહર્તુમિચ્છા વનિતાસખસ્ય તસ્યામ્ભસિ ગ્રીષ્મસુખે બભૂવ ॥ ૧૬-૫૪॥

સ તીરભૂમૌ વિહિતોપકાર્યામાનાયિભિસ્તામપકૃષ્ટનક્રામ્ ।
વિગાહિતું શ્રીમહિમાનુરૂપં પ્રચક્રમે ચક્રધરપ્રભાવઃ ॥ ૧૬-૫૫॥

સા તીરસોપાનપથાવતારાદન્યોન્યકેયૂરવિઘટ્ટિનીભિઃ ।
સનૂપુરક્ષોભપદાભિરાસીદુદ્વિગ્નહંસા સરિદઙ્ગનાભિઃ ॥ ૧૬-૫૬॥

પરસ્પરાભ્યુક્ષણતત્પરાણાં તાસાં નૃપો મજ્જનરાગદર્શી ।
નૌસંશ્રયઃ પાર્શ્વગતાં કિરાતીમુપાત્તાબાલવ્યજનાં બભાષે ॥ ૧૬-૫૭॥

પશ્ચાવરોધૈઃ શતશો મદીયૈર્વિગાહ્યમાનો ગલિતાઙ્ગરાગૈઃ ।
સંધ્યોદયઃ સાભ્ર ઇવેષ વર્ણં પુષ્યત્યનેકં સરયૂપ્રવાહઃ ॥ ૧૬-૫૮॥

વિલુપ્તમન્તઃપુરસુન્દરીણાં યદઞ્જનં નૌલુલિતાભિરદ્ભિઃ ।
તદ્બધ્નતીભિર્મદરાગશોભાં વિલોચનેષુ પ્રતિમુક્તમાસામ્ ॥ ૧૬-૫૯॥

એતા ગુરુશ્રોણિપયોધરત્વાદાત્માનમુદ્વોઢુમશક્નુવત્યઃ ।
ગાઢાઙ્ગદૈર્બાહુભિરપ્સુ બાલાઃ ક્લેશોત્તરં રાગવશાત્પ્લવન્તે ॥ ૧૬-૬૦॥

અમી શિરીષપ્રસવાવતંસાઃ પ્રભ્રંશિનો વારિવિહારિણીનામ્ ।
પારિપ્લવાઃ સ્રોતસિ નિમ્નગાયાઃ શૈવાલલોલાંશ્છલયન્તિ મીનાન્ ॥ ૧૬-૬૧॥

આસાં જલાસ્ફાલનતત્પરાણાં મુક્તાફલસ્પર્ધિષુ શીકરેષુ ।
પયોધરોત્સર્પિષુ શીર્યમાણઃ સંલક્ષ્યતે ન ચ્છિદુરોઽપિ હારઃ ॥ ૧૬-૬૨॥

આવર્તશોભા નતનાભિકાન્તેર્ભઙ્ગો ભ્રુવાં દ્વન્દ્વચરાઃ સ્તનાનામ્ ।
જાતાનિ રૂપાવયવોપમાનાન્યદૂરવર્તીનિ વિલાસિનીનામ્ ॥ ૧૬-૬૩॥

તીરસ્થલીબર્હિભિરુત્કલાપૈઃ પ્રસ્નિગ્ધકેકૈરભિનન્દ્યમાનમ્ ।
શ્રોત્રેષુ સંમૂર્ચ્છતિ રક્તમાસાં ગીતાનુગં વારિમૃદઙ્ગવાદ્યમ્ ॥ ૧૬-૬૪॥

સંદષ્ટવસ્ત્રેષ્વબલાનિતમ્બેષ્વિન્દુપ્રકાશાન્તરિતોડુતુલ્યાઃ ।
અમી જલાપૂરિતસૂત્રમાર્ગા મૌનં ભજન્તે રશનાકલાપાઃ ॥ ૧૬-૬૫॥

એતાઃ કરોત્પીડિતવારિધારા દર્પાત્સખીભિર્વદનેષુ સિક્તાઃ ।
વક્રેતરાગ્રૈરલકૈસ્તરુણ્યશ્ચૂર્ણારુણાન્વારિલવાન્વમન્તિ ॥ ૧૬-૬૬॥

ઉદ્બન્ધકેશશ્ચ્યુતપત્રલેખો વિશ્લેષિમુક્તાફલપત્રવેષ્ટઃ ।
મનોજ્ઞ એવ પ્રમદામુખાનામમ્ભોવિહારાકુલિતોઽપિ વેષઃ ॥ ૧૬-૬૭ ॥

સ નૌવિમાનાદવતીર્ય રેમે વિલોલહારઃ સહ તાભિરપ્સુ ।
સ્કન્ધાવલગ્નોદ્ધૃતપદ્મિનીકઃ કરેણુભિર્વન્ય ઇવ દ્વિપેન્દ્રઃ ॥ ૧૬-૬૮ ॥

તતો નૃપેણાનુગતાઃ સ્ત્રિયસ્તા ભ્રાજિષ્ણુના સાતિશયં વિરેજુઃ ।
પ્રાગેવ મુક્તા નયનાભિરામાઃ પ્રાપ્યેન્દ્રનીલં કિમુતોન્મયૂખમ્ ॥ ૧૬-૬૯ ॥

વર્ણોદકૈઃ કાઞ્ચનશ‍ૃઙ્ગમુક્તૈસ્તમાયતાક્ષ્યઃ પ્રણયાદસિઞ્ચન્ ।
તથાગતઃ સોઽતિતરાં બભાસે સધાતુનિષ્યન્દ ઇવાદ્રિરાજઃ ॥ ૧૬-૭૦ ॥

તેનાવરોધપ્રમદાસખેન વિગાહમાનેન સરિદ્વરાં તામ્ ।
આકાશગઙ્ગારતિરપ્સરોભિર્વૃતો મરુત્વાનનુયાતલીલઃ ॥ ૧૬-૭૧ ॥

યત્કુમ્ભયોનેરધિગમ્ય રામઃ કુશાય રાજ્યેન સમં દિદેશ ।
તદસ્ય જૈત્રાભરણં વિહર્તુરજ્ઞાતપાતં સલિલે મમજ્જ ॥ ૧૬-૭૨ ॥

સ્નાત્વા યથાકામમસૌ સદારસ્તીરોપકાર્યાં ગતમાત્ર એવ ।
દિવ્યેન શૂન્યં વલયેન બાહુમપોઢનેપથ્યવિધિર્દદર્શ ॥ ૧૬-૭૩ ॥

જયશ્રિયઃ સંવનનં યતસ્તદામુક્તપૂર્વં ગુરુણા ચ યસ્માત્ ।
સેહેઽસ્ય ન ભ્રંશમતો ન લોભાત્સ તુલ્યપુષ્પાભરણો હિ ધીરઃ ॥ ૧૬-૭૪ ॥

તતઃ સમાજ્ઞાપયદાશુ સર્વાનાનાયિનસ્તદ્વિચયે નદીષ્ણાન્ ।
વન્ધ્યશ્રમાસ્તે સરયૂં વિગાહ્ય તમૂચુરમ્લાનમુખપ્રસાદાઃ ॥ ૧૬-૭૫ ॥

કૃતઃ પ્રયત્નો ન ચ દેવ લબ્ધં મગ્નં પયસ્યાભરણોત્તમં તે ।
નાગેન લૌલ્યાત્કુમુદેન નૂનમુપાત્તમન્તર્હ્રદવાસિના તત્ ॥ ૧૬-૭૬ ॥

તતઃ સ કૃત્વા ધનુરાતતજ્યં ધનુર્ધરઃ કોપવિલોહિતાક્ષઃ ।
ગારુત્મતં તીરગતસ્તરસ્વી ભુજંગનાશાય સમાદદેઽસ્ત્રમ્ ॥ ૧૬-૭૭ ॥

તસ્મિન્હ્રદઃ સંહિતમાત્ર એવ ક્ષોભાત્સમાવિદ્ધતરંગહસ્તઃ ।
રોધાંસિ નિઘ્નન્નવપાતમગ્નઃ કરીવ વન્યઃ પરુષં રરાસ ॥ ૧૬-૭૮ ॥

તસ્માત્સમુદ્રાદિવ મથ્યમાનાદુદ્વૃત્તનક્રાત્સહસોન્મમજ્જ ।
લક્ષ્મ્યેવ સાર્ધં સુરરાજવૃક્ષઃ કન્યાં પુરસ્કૃત્ય ભુજંગરાજઃ ॥ ૧૬-૭૯ ॥

વિભૂષણપ્રત્યુપહારહસ્તમુપસ્થિતં વીક્ષ્ય વિશાંપતિસ્તમ્ ।

સૌપર્ણમસ્ત્રં પ્રતિસંજહાર પ્રહ્વેષ્વનિર્બન્ધરુષો હિ સન્તઃ ॥ ૧૬-૮૦॥

ત્રૈલોક્યનાથપ્રભવં પ્રભાવાત્કુશં દ્વિષામઙ્કુશમસ્ત્રવિદ્વાન્ ।
માનોન્નતેનાપ્યભિવન્દ્ય મૂર્ધ્ના મૂર્ધાભિષિક્તં કુમુદો બભાષે ॥ ૧૬-૮૧॥

અવૈમિ કાર્યાન્તરમાનુષસ્ય વિષ્ણોઃ સુતાખ્યામપરાં તનું ત્વામ્ ।
સોઽહં કથં નામ તવાચરેયમારાધનીયસ્ય ધૃતેર્વિઘાતમ્ ॥ ૧૬-૮૨॥

કરાભિઘાતોત્થિતકન્દુકેયમાલોક્ય બાલાતિકુતૂહલેન ।
હ્રદાત્પતજ્જ્યોતિરિવાન્તરિક્ષાદાદત્ત જૈત્રાભરણં ત્વદીયમ્ ॥ ૧૬-૮૩॥

તદેતદાજાનુવિલમ્બિના તે જ્યાઘાતરેખાકિણલાઞ્છનેન ।
ભુજેન રક્ષાપરિઘેણ ભૂમેરુપૈતુ યોગં પુનરંસલેન ॥ ૧૬-૮૪॥

ઇમાં સ્વસારં ચ યવીયસીં મે કુમુદ્વતીં નાર્હસિ નાનુમન્તુમ્ ।
આત્માપરાધં નુદતીં ચિરાય શુશ્રૂષયા પાર્થિવ પાદયોસ્તે ॥ ૧૬-૮૫॥

ઇત્યૂચિવાનુપહૃતાભરણઃ ક્ષિતીશં
શ્લાઘ્યૂ ભવાન્સ્વજન ઇત્યનુભાષિતારમ્ ।
સંયોજયાં વિધિવદાસ સમેતબન્ધુઃ
કન્યામયેન કુમુદઃ કુલભૂષણેન ॥ ૧૬-૮૬॥

તસ્યાઃ સ્પૃષ્ટે મનુજપતિના સાહચર્યાય હસ્તે
માઙ્ગલ્યોર્ણાવલયિનિ પુરઃ પાવકસ્યોચ્છિખસ્ય ।
દિવ્યસ્તૂર્યધ્વનિરુદચરદ્વ્યશ્નુવાનો દિગન્તા -
ન્ગન્ધોદગ્રં તદનુ વવૃષુઃ પુષ્પમાશ્ચર્યમેઘાઃ ॥ ૧૬-૮૭॥

ઇત્થં નાગસ્ત્રિભુવનગુરોરૌરસં મૈથિલેયં
લબ્ધ્વા બન્ધું તમપિ ચ કુશઃ પઞ્ચમં તક્ષકસ્ય ।
એકઃ શઙ્કાં પિતૃવધરિપોરત્યજદ્વૈનતેયા -
ચ્છાન્તવ્યાલામવનિમપરઃ પૌરકાન્તઃ શશાસ ॥ ૧૬-૮૮॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
કુમુદ્વતીપરિણયો નામ ષોડશઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 16 by Kalidas*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*